National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 162-166
© 2025 NJHSR
www.sanskritarticle.com

**प्रफुल्लकुमाररावतः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ (उत्तरप्रदेशः)

**डा. प्रफुल्लगडपालः**
सहाचार्यः, बौद्धदर्शनपालिविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ (उत्तरप्रदेशः)

**Correspondence:**
**प्रफुल्लकुमाररावतः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
लखनऊपरिसरः, लखनऊ (उत्तरप्रदेशः)

# आचार्यशान्तिभिक्षुशास्त्रिप्रणीतस्य बुद्धविजयकाव्यस्य दार्शनिक-सामाजिक-साहित्यिकादिमूल्याङ्कनम्

**प्रफुल्लकुमाररावतः, डा. प्रफुल्लगडपालः**

## 1. प्रस्तावना

भगवतः बुद्धस्य जीवनं, चरितम् उपदेशाश्च धार्मिकदृष्ट्या सह दार्शनिक-सांस्कृतिक-सामाजिक-मानवीयदृष्टिभिरपि अत्यन्तं महत्त्वपूर्णाः सन्ति। बुद्धचरितं मानवमूल्यप्रतिष्ठापनाय, करुणा-अहिंसा-मैत्री-प्रज्ञादीनां सार्वकालिकसिद्धान्तानां प्रतिपादनाय च अद्वितीयं साधनं वर्तते। अत एव बुद्धस्य जीवनकथा न केवलं बौद्धानां कृते, अपि तु समस्तमानवसमाजस्य नैतिक-आध्यात्मिकमार्गदर्शिका इति स्वीक्रियते।

पालित्रिपिटकसाहित्ये भगवतः बुद्धस्य जीवनप्रसङ्गाः सूत्रपिटक-विनयपिटकाभ्यां विविधस्थानेषु प्रस्फुटिताः दृश्यन्ते। दीघनिकाये, मज्झिमनिकाये, अंगुत्तरनिकाये, संयुत्तनिकाये, खुद्दकनिकाये तथा च विनयपिटके बुद्धस्य जन्म, महाभिनिष्क्रमणम्, सम्बोधिलाभः, धर्मचक्रप्रवर्तनं, महापरिनिर्वाणं च इत्यादयः जीवनप्रसङ्गाः प्रसङ्गवशात् निरूपिताः सन्ति। एते ग्रन्थाः बुद्धचरितस्य ऐतिहासिक-धार्मिक-दार्शनिकाधारं सुदृढीकुर्वन्ति। संस्कृतसाहित्ये अपि बुद्धचरितवर्णनपरम्परा अतीव समृद्धा वर्तते। महावस्तु, ललितविस्तरः, अश्वघोषप्रणीतं बुद्धचरितम्, सौन्दरनन्दम्, पद्यचूडामणिकाव्यम् (सिद्धार्थचरितम्) इत्यादयः ग्रन्थाः बुद्धचरितस्य काव्यात्मकं, भावप्रधानं दार्शनिकं च निरूपणं कुर्वन्ति। एतेषु ग्रन्थेषु बुद्धस्य करुणामयं चरितं, तपोमयः जीवनमार्गः, लोककल्याणप्रधानः उपदेशः च अत्यन्तं प्रभावपूर्णतया चित्रितः दृश्यते। एषा बुद्धचरितवर्णनपरम्परा कालक्रमेण न केवलं अक्षुण्णा अभवत्, अपि तु आधुनिककालेऽपि नूतनरूपेण विकसिताऽपि जाता।

आधुनिकसंस्कृतसाहित्ये बुद्धचरिताश्रितं काव्य-नाटक-गद्य-उपन्यास-स्फुटकाव्यात्मकं च विशालं साहित्यं विरचितं वर्तते। अस्मिन् साहित्यप्रवाहे कवयः न केवलं बुद्धस्य जीवनघटनाः पुनर्निरूपयन्ति, अपि तु तस्य शिक्षाः समकालीनसामाजिक-नैतिक-वैश्विकसमस्यानां सन्दर्भे नूतनदृष्ट्या प्रस्तुतयन्ति। एतस्मिन् एव सन्दर्भे आचार्यशान्तिभिक्षुशास्त्रिप्रणीतं बुद्धविजयकाव्यम् विशेषं स्थानं महत्त्वं च भजते। बुद्धविजयकाव्यं केवलं बुद्धचरितस्य काव्यात्मकं प्रस्तुतीकरणं न, अपि तु बौद्धदर्शनस्य, मानवीयमूल्यानां लोककल्याणभावनायाः च सशक्तं साहित्यिकप्रतिरूपं वर्तते। अतः आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु अस्य ग्रन्थस्य स्थानं महत्त्वं च विशदतया विवेचनीयम् इति अस्य शोधपत्रस्य मुख्यः प्रयोजनः।

## 2. आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्यानि

आधुनिकसंस्कृतसाहित्ये बुद्धचरिताश्रितकाव्यपरम्परा अत्यन्तं समृद्धा, बहुविधा सर्जनात्मकदृष्ट्या च महत्त्वपूर्णा वर्तते। स्वातन्त्र्योत्तरकाले संस्कृतभाषायाः पुनरुत्थानपरम्परायां बुद्धचरितं केन्द्रीयविषयरूपेण स्वीकृत्य कविभिः, नाटककारैः, गद्यलेखकैः च नूतनसन्दर्भेषु प्रस्तुतं कृतम्। अत्र केवलं बुद्धस्य

जीवनकथावर्णनं न दृश्यते, अपि तु तस्य शिक्षाः, दर्शनं, करुणा-अहिंसा-समता-प्रज्ञादयः विषयाः आधुनिकमानवसमाजस्य समस्याभिः सह सम्बध्य विवेचिताः सन्ति।

आधुनिकसंस्कृतसाहित्ये बुद्धचरिताश्रितसाहित्यं मुख्यतया काव्य-रूपक-उपन्यास-गद्य-स्फुट काव्यादिरूपेण विकसितं दृश्यते। तद्यथा —

**2.1 काव्यानि**

आधुनिकसंस्कृतमहाकाव्यपरम्परायां बुद्धचरिताश्रितानि काव्यानि विशेषं स्थानं धारयन्ति। एतेषु काव्येषु बुद्धस्य जीवनं, बोधिसत्त्वमार्गः, त्यागः, करुणा च महाकाव्यात्मकभव्यतया निरूपिताः—

1. **श्रीबोधिसत्त्वचरितम्** — आचार्यसत्यव्रतशास्त्री
2. **बुद्धविजयकाव्यम्** — आचार्यशान्तिभिक्षुशास्त्री
3. **यशोधरामहाकाव्यम्** — पं. ओगेटि परीक्षित् शर्मा
4. **बुद्धोदयकाव्यम्** — आचार्यशान्तिभिक्षुशास्त्री
5. **श्रीमद्बुद्धभागवतम्** — ओसकेरे नागप्पशास्त्री

**2.2 रूपकाणि**

रूपकसाहित्ये बुद्धचरितं नाट्यरूपेण प्रस्तुत्य प्रत्यक्षसंवेदनशीलतया दर्शकान् प्रभावितुं समर्थं जातम्—

1. **सिद्धार्थचरितम्** — डा. वीरेन्द्रकुमारभट्टाचार्यः
2. **सुजाता** (नाटिका) — डा. चन्द्रभानुत्रिपाठी
3. **आम्रपाली** — डा. मिथिलेशकुमारीमिश्रा
4. **महाभिनिष्क्रमणम्** — देवर्षि कलानाथशास्त्री
5. **धर्मचक्रप्रवर्तनम्** — प्रो. वसन्तकुमारभट्टः

**2.3 उपन्याससाहित्यम् (अनूदितम्)**

आधुनिककाले विश्वसाहित्यस्य प्रभावेण संस्कृतभाषायामपि बुद्धचरिताश्रितोपन्यासाः अनूदितरूपेण प्रविष्टाः—

1. **महाप्रस्थानम्** — अशोकन् पुर्नाट्टुकरा (अनुवादः)
2. **सिद्धार्थः** — डा. एल्. सुलोचनादेवी (अनुवादः)

**2.4 गद्यसाहित्यम्**

गद्यसाहित्ये बुद्धचरितं ऐतिहासिक-दार्शनिक-विवेचनात्मकशैलीया प्रस्तुतं दृश्यते—

1. **महाबुद्धवस्तु** (संस्कृतभूमिका) — डा. भरतसिंहोपाध्यायः
2. **करुणासमुद्रः गौतमबुद्धः** — मधुसूदनपेन्ना

**2.5 स्फुटकाव्यानि**

स्फुटकाव्येषु भगवान् बुद्धः आदर्शपुरुषरूपेण, नवमावतारत्वेन, करुणासागररूपेण वा निरूपितः। डा. हर्षदेवमाधव, बनमाली-बिश्वाल, चिन्तामणिद्वारकानाथदेशमुख, शिवप्रसादभारद्वाज, मञ्जूषाचन्नै इत्यादीनां कवीनां काव्येषु बुद्धचरितस्य प्रभावः स्पष्टतया परिलक्ष्यते।

एवं दृश्यते यत् आधुनिकसंस्कृतसाहित्ये बुद्धचरिताश्रितं काव्यादिसाहित्यं केवलं परम्परानुकरणं न, अपि तु समकालीनसन्दर्भेषु बुद्धधर्मस्य नूतनव्याख्यानं वर्तते। एतेषु सर्वेषु ग्रन्थेषु मध्ये बुद्धविजयकाव्यम् आकारे, गाम्भीर्ये, उपदेशप्रधानतायां च विशिष्टं स्थानं धारयति—यस्य विवेचनं अग्रिमखण्डे क्रियते।

**3.आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु बुद्धविजयकाव्यस्य स्थानम्**

आधुनिकसंस्कृतबुद्धचरितात्मककाव्यपरम्परायां बुद्धविजयकाव्यम् अत्यन्तं विशिष्टं, प्रतिष्ठितं मानकग्रन्थरूपेण स्वीकृतं च वर्तते। अस्य महाकाव्यस्य प्रणेताः आचार्य शान्तिभिक्षु शास्त्री संस्कृतसाहित्ये बौद्धविद्यायाश्च अद्वितीयः विद्वान् आसीत्। संस्कृतकाव्यपरम्परायाः शास्त्रीयनियमज्ञानं, पालि–संस्कृत–बौद्धदर्शनयोः गहनपरिचयः, आधुनिकमानवसमस्यासु बौद्धशिक्षायाः प्रासङ्गिकताबोधः च—एते सर्वे गुणाः अस्मिन् महाकाव्ये सम्यग् अभिव्यक्ताः दृश्यन्ते।

एतत् महाकाव्यम् 19 पर्वसु विभक्तं, 100 सर्गैः युक्तं, प्रायः 5100 श्लोकानां समृद्धं च वर्तते; अतः पञ्चसाहस्रीसंहिता इत्यपि अस्य प्रसिद्धिः वर्तते। आधुनिकसंस्कृतमहाकाव्येषु एतादृशं विशालप्रमाणं विरलमेव दृश्यते। काव्यस्य संरचना अत्यन्तं सुनियोजिता वर्तते—पूर्वार्धे बोधिसत्त्वचरितस्य मानवीयजीवनस्य वर्णनं च, उत्तरार्धे बुद्धत्वप्राप्त्यनन्तरं धर्मप्रचारस्य, उपदेशानां च विस्तृतं निरूपणं कृतम्।

यद्यपि अस्मिन् काव्ये ललितविस्तर, महावस्तु इत्यादीनां प्राचीनबुद्धचरितग्रन्थानां प्रभावः परिलक्ष्यते, तथापि बुद्धविजय-काव्यस्य रचना केवलं परम्परानुकरणरूपा नास्ति। कविना बुद्धचरितं उपदेशप्रधानदृष्ट्या, समकालीनसामाजिकसन्दर्भैः संयोज्य, पूर्णतया मौलिकरूपेण विन्यस्तम्। विशेषतः बुद्धोपदेशानां पर्वशः, सर्गशः च प्रस्तुतीकरणं अस्य महाकाव्यस्य वैशिष्ट्यं वर्तते।

अत्र भगवतः बुद्धस्य जन्म, महाभिनिष्क्रमणम्, सम्बोधिलाभः (बुद्धत्वप्राप्तिः), धर्मचक्रप्रवर्तनम्, महापरिनिर्वाणं च क्रमशः सुस्पष्टतया, काव्यात्मकगाम्भीर्येण च वर्णितम्। एतेषां जीवन-प्रसङ्गानां माध्यमेन कविना त्यागः, करुणा, अहिंसा, प्रज्ञा, मध्यममार्गः, आर्यसत्यदर्शनं च प्रभावपूर्णतया प्रतिपादितम्।

तथैव अस्मिन् महाकाव्ये बुद्धस्य पूर्वजन्मकथाः (जातकप्रसङ्गाः), तदानीन्तनसमाजस्य सामाजिक – राजनैतिक - आर्थिकस्थितयः, राजसत्ता–जनजीवनसम्बन्धाः, श्रमणब्राह्मणपरम्परायाः स्थितिश्च

सुबोधया, सरसया च संस्कृतभाषया निरूपिताः। एतेन बुद्धविजयकाव्यं न केवलं धार्मिकं वा दार्शनिकं ग्रन्थं भवति, अपि तु ऐतिहासिक-सांस्कृतिकदृष्ट्याऽपि महत्त्वपूर्णं साहित्यिकदस्तावेज-रूपेण प्रतिष्ठां लभते।

एवं प्रकारेण आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु बुद्धविजयकाव्यं आकारेण, विषयविस्तारेण, दार्शनिकगाम्भीर्येण, उपदेशप्रधानतया च सर्वोच्चं स्थानं धारयति। अस्य तुल्यं विस्तृतं, समन्वितं, लोककल्याणप्रधानं च बुद्धचरितमहाकाव्यं आधुनिक-संस्कृतसाहित्ये दुर्लभमेव इति वक्तुं शक्यते।

**4. श्रीबुद्धविजयकाव्यस्य प्रासङ्गिकता**

आचार्यशान्तिभिक्षुशास्त्रिप्रणीतं बुद्धविजयकाव्यम् उपदेशैः शिक्षाभिश्च संवलितं रमणीयं महाकाव्यं वर्तते। अस्मिन् महाकाव्ये भगवतो बुद्धस्य जीवनचरितं, बौद्धधर्मस्य तत्त्वानि, लोककल्याणोपयोगिनः उपदेशाः च विस्तरेण निरूपिताः सन्ति। बौद्धशास्त्रेषु सुप्रसिद्धं वचनं विद्यते— 'यत् बुद्धभाषितं तत्सुभाषितम्' इति। तदनुसारेण बुद्धेन यत्किमपि भाषितं तत्सर्वं सुभाषितरूपेण स्वीक्रियते।

एवमेव बुद्धविजयकाव्ये बुद्धभाषितानां सुभाषितानां विशालः सङ्ग्रहः उपलभ्यते। वस्तुतः अस्य महाकाव्यस्य प्रत्येकः सर्गः सदुपदेशैः शिक्षाभिश्च परिपूर्णः अस्ति। कविना पर्वशः बुद्धशिक्षाः सुसंगतरीत्या प्रस्तुताः, यत्र प्राच्यबौद्धधर्मग्रन्थानुसारेण बुद्धप्रवच-नानि यथायोग्यं समावेशितानि दृश्यन्ते।

प्रथमपर्वणः बुद्धवन्दनाभिधाने प्रथमे सर्गे कविः भगवन्तं बुद्धं श्रद्धाभावेन वन्दते; तं सुभाषितसागरः इति विशिष्य स्तौति च —

**सुभाषितानां गम्भीरं सागरं प्रणमाम्यहम्।**
**स्यन्दते यत्र यत्किञ्चित् सुभाषितनदीनदम्॥**[1]

अत्र बुद्धस्य वाणी सुभाषितनदीरूपेण जगति प्रवहतीति भावः प्रतिपादितः। बुद्धशिक्षाभिः जगत् सुखी भवतीति भावनां कविः पुनः स्पष्टयति—

**स्पृहयामि कृपापारावाराय बृहदात्मने।**
**यत्कृपाबिन्दुमासाद्य जगतीयं सुखायते॥**[2]

भगवतो बुद्धस्य धर्मः आदौ, मध्ये, अन्ते च कल्याणकरः वर्तते— इति भावं कविः अधोलिखितश्लोकेन व्यक्तीकरोति—

**आदिमध्यान्तकल्याणो धर्मो गगनसंनिभः।**
**आश्रयः सर्वसत्त्वानां यस्य सोऽस्तु ममाश्रयः॥**[3]

द्वितीये सर्गे बौद्धताभिवन्दननाम्नि कविः न केवलं भगवतो बुद्धस्य स्तुतिं करोति, अपि तु सदाचरणशीलान् बौद्धान् अपि नमस्करोति।[4] अत्र बुद्धविचारैः प्रभाविताः बोधिसत्त्वाः, बुद्धानुयायिनश्च श्रद्धया सम्पूजिताः दृश्यन्ते।

बौद्धधर्मस्य मूलस्वरूपं 'अहिंसा परमो धर्मः' इति दर्शयन् कविः अहिंसायाः महत्त्वं दृढतया प्रतिपादयति—

**धर्मं हि शरणं गत्वा ते शान्तिं शरणं गताः।**
**अहिंसा परमा शान्तिः शान्तं धर्मं नमाम्यहम्॥**[5]

अत्र अहिंसा, अचौर्य, शील, सत्यवचनं, मद्यविरतिः इत्यादयः सद्गुणाः प्रशंसिताः, तेषां विपरीतानां दुर्गुणानां निन्दा च कृता। बुद्ध-धर्म-सङ्घेषु शरणगमनस्य महत्त्वं कविना सुस्पष्टतया निरूपितम्।

द्वितीयपर्वणः बोधिव्रतकथाभिधाने दीपङ्करबुद्धेन सुमेधबोधि-सत्त्वस्य भविष्यद्बुद्धत्वं व्याकृतम्। अत्र बोधिव्रतपरायणस्य बोधिसत्त्वस्य गुणाः वर्ण्यन्ते—

**दानं ददाति लोकाय बोधिव्रतपरायणः।**
**परार्थबन्धनोऽबद्धो विधातुं दुःखिनां सुखम्॥**[6]

अग्रे नृपस्य सद्बुद्धेः विकासः दर्श्यते, यत्र सः शीलपालनस्य अनिवार्यतां प्रतिपादयति—

**आत्मानमप्रभुः पातुं चेद् दौःशील्यादहं वद।**
**शीलेन योजयिष्येऽत्र पालयिष्ये कथं प्रजाः॥**[7]

तृतीयपर्वतः आरभ्य षष्ठपर्वपर्यन्तं भगवतो बुद्धस्य मानवीयजीवनस्य सजीवं वर्णनं दृश्यते। बोधिप्राप्त्यनन्तरं काशीस्थ-ऋषिपतनस्य मृगदावोपवने पञ्चवर्गीयभिक्षून् प्रति बुद्धः मध्यममार्गस्य उपदेशं करोति—

**उभावन्तौ परित्यज्य मध्यमा प्रतिपन्मम।**
**शान्तिबोधिमुखेनेयं दुःखनिर्वाणकारिणी॥**[8]

ततः आर्यसत्यानां निरूपणेन सह प्रतीत्यसमुत्पादसिद्धान्तः प्रतिपाद्यते—

**धर्मा ये हेतुप्रभवास्तेषां यो हेतुरुद्भवे।**
**हेतुस्तथा निरोधे यस्तमत्राह तथागतः॥**[9]

सामाजिक-आर्थिकदृष्ट्या अपि बुद्धोपदेशस्य महत्त्वं कविना स्पष्टं कृतम्—

**दरिद्रो विद्यते कोऽपि धनवानत्र कश्चन।**
**दरिद्रदुःखहर्ता हि धनाढ्यः किल शोभते॥**[10]

अयं उपदेशः साम्प्रतिककाले सामाजिक-आर्थिकविषमतायाः शमनाय अत्यन्तोपयोगी वर्तते। एवं प्रकारेण बुद्धविजयकाव्ये बुद्धोपदेशानां प्रचुरः, सुसंगठितः, जीवनोपयोगी सङ्ग्रहः च उपलभ्यते। एते उपदेशाः केवलं धार्मिकोपदेशाः न, अपि तु मानवीयजीवनस्य नैतिक-सामाजिक-दार्शनिककल्याणाय मार्गदर्श-करूपेण प्रतिष्ठिताः सन्ति। अतः श्रीबुद्धविजयकाव्यस्य प्रासङ्गिकता साम्प्रतिकसमाजे निर्विवादं सिद्धा भवति।

**5.आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु बुद्धविजयकाव्यस्य महत्त्वम्**

आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु बुद्धविजयकाव्यम् बहुआयामीदृष्ट्या अत्यन्तं महत्त्वपूर्णं ग्रन्थरूपेण प्रतिष्ठितम्। अस्य महत्त्वं दार्शनिक – सामाजिक - नैतिक-साहित्यिक-वैश्विकमानवीय-दृष्टिभिः समग्रतया विवेचनीयम्। आचार्यशान्तिभिक्षुशास्त्रिणा रचितेऽस्मिन् महाकाव्ये बुद्धचरितं केवलं ऐतिहासिकवर्णनरूपेण न, अपि तु उपदेशप्रधानजीवनदर्शनरूपेण प्रस्तुतं दृश्यते।

**5.1 दार्शनिकं महत्त्वम्**

बुद्धविजयकाव्यस्य दार्शनिकं महत्त्वं अत्यन्तं गाम्भीर्यपूर्णं वर्तते। अस्मिन् महाकाव्ये बौद्धदर्शनस्य मूलतत्त्वानि—आर्यसत्यानि, प्रतीत्यसमुत्पादः, मध्यममार्गः, त्रिरत्नसिद्धान्तः, अहिंसा, करुणा, प्रज्ञा, निर्वाणलक्ष्यम् इत्यादयः—काव्यात्मकशैलीया सुबोधतया प्रतिपादिताः सन्ति।

विशेषतया प्रसिद्धः बौद्धदर्शनसिद्धान्तः—

**ये धर्मा हेतुप्रभवाः हेतुं तेषां तथागतो ह्यवदत्।**
**तेषां च यो निरोध एवंवादी महाश्रमणः॥**[11]

—अस्मिन् काव्ये भावगाम्भीर्येण, रसात्मकतया च प्रतिष्ठापितः। एतेन प्रतीत्यसमुत्पादसिद्धान्तः दार्शनिकसूत्ररूपेण एव न, अपि तु जीवनव्यवहारस्य आधाररूपेण प्रस्तुतो भवति। मध्यममार्गस्य निरूपणेन भोगवाद-आत्मक्लेशवादयोः उभयोः निरासः कृतः, यः आधुनिकमानवजीवनस्य सन्तुलनाय अत्यन्तोपयोगी वर्तते।

**5.2 सामाजिक-नैतिकं महत्त्वम्**

बुद्धविजयकाव्ये प्रतिपादिताः नैतिकमूल्याः साम्प्रतिकसमाजस्य सन्दर्भे विशेषतया प्रासङ्गिकाः सन्ति। अहिंसा-शील-दान-सत्य-संयम-करुणा-समतादयः गुणाः मानवसमाजस्य नैतिकपतननिवा-रणाय सशक्तं साधनं भवन्ति।

अस्मिन् सन्दर्भे कविना अहिंसायाः प्रासङ्गिकता अत्यन्तं प्रभावशालिना श्लोकेन निरूपिता—

**अस्मिन् कलियुगे क्रूरे हिंसयोन्मत्तदुर्जने।**
**पाठयन्तमहिंसाया पाठं तं नौमि गौतमम्॥**[12]

अयं श्लोकः आधुनिकहिंसाग्रस्तसमाजस्य यथार्थं प्रतिबिम्बयन् अहिंसाधर्मस्य सार्वकालिकमहत्त्वं प्रतिपादयति। बुद्धविजयकाव्ये वर्णिताः उपदेशाः सामाजिकसमरसता, वर्गसमता, करुणाभावना च पोषयन्ति, ये अद्यतनकाले समाजसुधाराय अत्यावश्यकाः सन्ति।

**5.3 साहित्यिकं महत्त्वम्**

साहित्यिकदृष्ट्या बुद्धविजयकाव्यम् आधुनिकसंस्कृतमहाकाव्येषु उत्कृष्टं स्थानं धारयति। अस्मिन् काव्ये महाकाव्यलक्षणानां यथानुपालनं, सर्ग-पर्व-विन्यासस्य सुव्यवस्था, कथाविकासस्य सुसंगतता, अलङ्कार-रस-छन्दोविधानस्य समुचितप्रयोगः च दृश्यते। प्राञ्जला, सुबोधा, प्रवाहमयी संस्कृतभाषा अस्य काव्यस्य प्रमुखं वैशिष्ट्यं वर्तते। रसदृष्ट्या करुणा–शान्तिरसयोः प्राधान्यं दृश्यते, यत् बुद्धचरितानुकूलं वर्तते। उपदेशप्रधानश्लोकानां प्रचुरतया समावेशेन काव्यं केवलं सौन्दर्यप्रधानं न, अपि तु जीवनोपयोगी सन्देशवाहकं भवति।

**5.4 वैश्विक-मानवीयं महत्त्वम्**

बुद्धविजयकाव्यस्य महत्त्वं केवलं भारतीय-सांस्कृतिकपरिसीमायां न सीमितं, अपि तु वैश्विक-मानवीयस्तरे अपि विस्तीर्णं वर्तते। अस्मिन् ग्रन्थे प्रतिपादिताः उपदेशाः—अहिंसा, करुणा, शान्ति, सहिष्णुता, मैत्री, लोककल्याणभावना—सर्वमानवसमाजाय समान-रूपेण कल्याणकराः सन्ति।

एतेन ग्रन्थेन बुद्धधर्मस्य वैश्विकमानवीयस्वरूपं, सार्वकालिक-सन्देशः, विश्वशान्त्याः आधारभूतदर्शनं च सुदृढीकृतम्। आधुनिकविश्वे युद्ध, हिंसा, असहिष्णुता, नैतिकसंकटादीनां समाधानाय बुद्धविजयकाव्ये प्रतिपादिताः शिक्षाः मार्गदर्शकत्वेन स्वीकर्तुं शक्यन्ते।

एवं प्रकारेण बुद्धविजयकाव्यं दार्शनिकगाम्भीर्येण, सामाजिक-नैतिकप्रासङ्गिकतया, साहित्यिक-उत्कर्षेण वैश्विकमानवीयसन्देशेन च आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु अनुपमेयं महत्त्वं धारयति। अतोऽस्य महाकाव्यस्य मूल्याङ्कनं केवलं साहित्यिकसीमायां न, अपि तु समग्रमानवकल्याणदृष्ट्या करणीयम्।

एवं समग्रतया विचार्यमाणे आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मक-काव्येषु बुद्धविजयकाव्यम् अद्वितीयं, विशिष्टं मानकग्रन्थरूपेण प्रतिष्ठितं च वर्तते। अस्य महाकाव्यस्य वैशिष्ट्यं केवलं बुद्धचरितस्य विस्तृतं काव्यात्मकं वर्णनं न, अपि तु बौद्धदर्शनस्य गभीरतत्त्वानां, मानवीयमूल्यानां, सामाजिकन्यायभावनायाश्च सजीवं साहित्यिक-घोषणापत्रं भवति।

आचार्यशान्तिभिक्षुशास्त्रिणा रचितेऽस्मिन् महाकाव्ये भगवतः बुद्धस्य जीवनकथा इतिहासवर्णनरूपेण एव न प्रस्तुता, अपि तु उपदेशप्रधानजीवनदर्शनरूपेण विन्यस्ता दृश्यते। आर्यसत्यानि, प्रतीत्यसमुत्पादः, मध्यममार्गः, अहिंसा, करुणा, प्रज्ञा, शील, दान, समता इत्यादयः बौद्धधर्मस्य मूलसिद्धान्ताः काव्यात्मकभाषया सुबोधतया च प्रस्तुताः सन्ति। एते सिद्धान्ताः मनुष्यजीवनस्य आन्तरिकशान्तये, सामाजिकसमरसतायै, वैश्विकमानवकल्याणाय च अत्यन्तोपयोगिनः सन्ति।

साम्प्रतिकविश्वे यत्र हिंसा, वैमनस्य, असहिष्णुता, नैतिकपतनं, सामाजिकविषमता, आत्मकेन्द्रितजीवनदृष्टिश्च वर्धमाना दृश्यन्ते, तत्र बुद्धविजयकाव्ये प्रतिपादिताः शिक्षाः समाधानमार्गरूपेण उपतिष्ठन्ते। अस्य काव्यस्य माध्यमेन अहिंसाधर्मः, करुणाभावना, लोककल्याणचिन्ता, नैतिकजीवनस्य आदर्शः च प्रभावपूर्णतया प्रतिष्ठाप्यते।

साहित्यिकदृष्ट्या अपि बुद्धविजयकाव्यम् आधुनिकसंस्कृत-महाकाव्येषु आकारेण, विषयविस्तारेण, दार्शनिकगाम्भीर्येण, रसप्रधानतया (करुणा–शान्तिरसयोः), प्राञ्जल-सुबोध-संस्कृतभाषया च उत्कर्षं प्राप्नोति। उपदेशप्रधानश्लोकानां प्रचुरसमावेशेन एषः ग्रन्थः पाठकानां केवलं सौन्दर्यबोधं न, अपि तु जीवनमार्गदर्शनमपि प्रदानं करोति।

अतः स्पष्टतया वक्तुं शक्यते यत् आधुनिकसंस्कृतसाहित्ये बुद्धचरितात्मककाव्येषु बुद्धविजयकाव्यस्य स्थानं महत्त्वं च निर्विवादं महत्तरम्। एषः ग्रन्थः संस्कृतसाहित्यस्य एव न, अपि तु समस्तमानवजातेश्च बौद्धिक-नैतिक-आध्यात्मिकविकासाय अमूल्यः निधिरूपेण भविष्यति इति निश्चप्रचमेवाति शम्।

**सन्दर्भग्रन्थसूची**


1. बुद्धविजयकाव्यम् — आचार्यः शान्तिभिक्षुशास्त्री; केन्द्रीय बौद्ध विद्या संस्थानम्, चोगलमसर, लेह–लद्दाख; वर्षः 1988। (स्वोपज्ञ-हिन्द्यनुवादेन सह; बौद्धहिमालयग्रन्थमाला, सप्तमप्रसूनम्)
2. ललितविस्तरः — सम्पा. पी. एल. वैद्य, दरभंगा : मिथिला इंस्टिट्यूट, 1958
3. बुद्धोदयकाव्यम् — आचार्यः शान्तिभिक्षुशास्त्री; केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, 2015
4. नाट्यशास्त्रम् — भरतमुनिः, सम्पा. रामकृष्ण कवि, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, 2006।
5. आधुनिकसंस्कृतसाहित्यसन्दर्भसूची — प्रो. वेम्पटि कुटुम्बशास्त्री, नवदेहली : राष्ट्रियसंस्कृतसंस्थानम्, 2002।
6. आधुनिकसंस्कृतसाहित्यश्रीः — राधावल्लभ त्रिपाठी, दिल्ली : प्रतिभा प्रकाशनम्, 2001।
7. संस्कृत साहित्य का अभिनव इतिहास — डा. राधावल्लभ त्रिपाठी, वाराणसी : विश्वविद्यालय प्रकाशन, 2001।
8. संस्कृत बौद्ध साहित्य में इतिहास और संस्कृति — अँगने लाल, लखनऊ : उ.प्र. हिन्दी संस्थान, 2006।


**पाद टिप्पणीः-**

[1]बुद्धविजयकाव्यम्, 1.30

[2]तत्रैव, 1.32

[3]तत्रैव, 1.45

[4]तत्रैव, 2.1– 14

[5]बुद्धविजयकाव्यम्, 2.18

[6]तत्रैव, 6.44

[7]तत्रैव, 8.26

[8]तत्रैव, 41.16

[9] बुद्धविजयकाव्यम्, 54.9

[10]तत्रैव, 44.12

[11]तत्रैव, 54.9

[12]बुद्धविजयकाव्यम् 1.26